Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

12

अरैयर् श्रीरामशर्म रचिता

श्री बालधन्वी वेङ्कटार्यादिनचर्या

श्रीयादवाद्रौ कृतनित्यवासात् श्रीबालधन्व्यन्वयशिङ्गरार्यात् ।
श्रितोपकाराय कृतावतारं श्रीवेङ्कटार्यं गुरुमाश्रयामः ॥ १ ॥

यदीयनित्याचरणक्रमाणां अंशांशतस्स्वीकरणेऽपि नित्यम् ।
भवन्ति दिव्यानुभवादयस्तं तदीयचर्यावचनैरुपैमि ॥ २ ॥

योगस्वरूपामनुभूय निद्रां प्रातः प्रबुद्धं कमलासनस्थम् ।
हृद्यानि पद्यानि हरेः पठन्तं श्रीवेङ्कटं नौमि गुरुं मदीयम् ॥ ३ ॥

प्रबोध्य शिष्यान् कृपया स्वयं तैस्साकं तटाकं सरसाशयं तम् ।
गच्छन्तमच्छामरशब्दमुख्यान् प्रपाठयन्तं गुरुवर्यमीडे ॥ ४ ॥

ततश्शुभाचारशतोपदेशैराप्लावयन्तं प्लवनैश्च तांस्तान् ।
विचित्रगत्या विनिमज्जनैस्तं जले शयानं गुरुमाश्रयामि ॥ ५ ॥

शुद्धे च तोये पटगालितांशैश्शुद्धस्वरूपस्वधृताम्बराणि ।
स्निग्धोपलस्योपरि हस्तचारीविशेषतश्शोधयिता स वस्स्यात् ॥ ६ ॥

तदैव वेदान्तविचारचर्चां बुधैरुदीर्णाश्च विवेचयन्तम् ।
धर्मादि कर्माणि च निर्णयन्तं जलाशयोज्जीवनमाश्रये तम् ॥ ७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्नात्वऽथ च श्रीगुरुपादतीर्थे गुरूक्तमन्त्रैश्शुचिपट्टवस्त्रम् ।
धृत्वैव पुण्ड्रश्च रहस्यरीत्या सन्ध्यामुपासीनमुपासिषीय ॥ ८

अथोपवस्त्रापिहितावलग्नं शिष्यांश्च मेधावितयोपकर्तुम् ।
प्रशस्तपद्यैर्हरिकीर्तिकाव्यैरन्त्यादिमालां घटयन्तमीडे ॥ ९ ॥

गच्छन्तमार्द्रं परिधूय वस्त्रं संहत्य कृत्वा चतुरश्रचारु ।
शिष्यस्य चित्तश्च विधूतदोषं कुर्वन्तमन्वेमि तमेकपद्याम् ॥ १० ॥

अथाद्रिमारुह्य कुटीं प्रविष्टं धृताम्बरं धारिततीर्थकुम्भम् ।
कक्ष्यान्तरे विस्तृतपुण्ड्रपेटिं कृष्णाजिनासीनमुपैमि नित्यम् ॥११॥

सपीठमूर्ध्वं सितसान्तरालं ललाटरङ्गे चतुरश्रपुण्ड्रम् ।
श्रीचूर्णशोणान्तरमादधानं पश्याम्यथाङ्गेषु तथैव पुण्ड्रान् ॥ १२ ॥

प्रणम्य च द्वादशमूर्तिभेदान् पुण्ड्रेषु सौधेष्विव मन्दिरेषु ।
पवित्रपद्माक्षमणीन्द्रमाला मालान्तुलस्याश्च भजे भजन्तम् ॥१३॥

षट्चक्रसीतापतिमूर्तिमग्रे सुदर्शनं वामनमेवमेव ।
श्रीमूर्तिरत्नान्यभिषिच्य तीर्थैश्शिष्यान्सतीर्थ्यानपि तीर्थयेत्सः ॥

अष्टोत्तरस्थानशतस्थदेवैरनुग्रहेण प्रहिताश्च दिव्याम् ।
श्रीपादपट्टावलिमुन्नयन्स्वे स मूर्ध्नि चास्तां सततं श्रितानाम् ॥१५॥

तस्मिन्सुधूपे निरवग्रहे स्वे कक्ष्यान्तरे निर्मलनित्यरम्ये ।
एकान्तयोगेन नियम्य चात्मन् हृद्यागनिष्ठं हृदि भावये तम् ॥ १६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीचक्रवाराहनृसिंहविष्णुत्रिविक्रमाश्वाननमुख्यमन्त्रान् ।
जपन्तमन्तर्मुदमुद्वहन्तं तं दैवतानां परमं नतोऽस्मि ॥ १७ ॥

ततस्समुत्थाय समाधियोगात् प्रपत्तियोगानुगयागभूमिम् ।
यान्तं गृहं तं यदुशैलनेतुर्नारायणस्यानुभवेयमार्यम् ॥ १८ ॥

मध्ये गुरूणाङ्गुरुमन्तरङ्गं वरं वरं योगिनमन्तरङ्गे ।
सिध्यंतरायघ्नमनुस्मरन्तं नमन्तमन्तस्सततं नमामि ॥ १९ ॥

दिव्यप्रबन्धागमभाष्यपीठीं प्रणम्य पूर्वैः प्रणतां सगोष्ठीम् ।
नत्वाथ देवाय च दण्डवद्यः प्रदक्षिणस्सोऽस्तु सुदक्षिणो मे ॥२०॥

संसेव्य भक्त्या यतिराजमादौ तद्दर्शितं चक्रमितश्शठारिम् ।
ततश्श्रियं यादवशैलनेत्रीं नेत्रैः पिबन्तं पदयोः प्रपद्ये ॥ २१ ॥

ततश्श्रिया वल्लभया सनाथं सम्पत्कुमारं प्रणिपत्य पश्यन् ।
यतीन्द्रचित्ताभिधमण्टपान्तः कृतस्तुतिस्स्तव्यगुणो ममास्तु ॥२२॥

शठजित्कलिजित्कलितोभयप-
क्षकमुज्ज्वलसूत्रवतीदयितम् ।
प्रणिपत्य ततः प्रतिहारपती
हरिदर्शनमङ्गलदस्स गुरुः ॥ २३ ॥

कैङ्कर्यं समयोचितं भगवते कुर्वंस्तदीयान्भजन्
छत्रीचामरतीर्थवस्त्रतुलसीनामावलीरर्पयन् ।
तद्दत्तां सकिरीटमाल्यतुलसीं विज्ञापकाख्यां वहन्
अग्रे द्राविडसामवाग्विवरणीं गायन्स मे देशिकः ॥ २४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आशास्य मङ्गलमुपास्य च तीर्थमस्य
पादू विधार्य शिरसा तुलसीं गृहीत्वा ।
अन्यान्गुरून्परिचरांश्च सभाजयित्वा
गेहं गतो गुरुरसौ हृदयंगतो मे ॥ २५ ॥

शिखारम्यं फालोल्लसितसितपुण्ड्रं स्मितमुखं
स्फुरन्नेत्रं सुभ्रूश्रवणनसमायद्भुजयुगम् ।
समव्यूढोरस्कं मसृणमणिसूत्रं सुवसनं
मिलत्पादं पद्मासनमनुभवेद्वेङ्कटगुरुम् ॥ २६ ॥

अथ रहस्यगणान्गुणगौरवात्समुपदिश्य सलक्ष्मणभाषितान् ।
कलितशिष्यगणोऽस्तु स पूजितस्वगृहदेवनृसिंहसुदर्शनः ॥ २७ ॥

नृसिंहसन्दर्शितदिव्यसंविन्मणिप्रकाशस्थिरधर्ममेधम् ।
समस्तसज्जीवनवर्षियज्ञं महर्षिमत्कौशिकगोत्रमीडे ॥ २८ ॥

अथ सममनुयागं संविधाय स्वकीयैः
सुविहितचरुसारं शास्त्रपूतक्रमेण ।
उचितममृतमन्नं ब्रह्मवित्पञ्चमेह्नः
प्रणयति जठराग्नेः प्रीणनं यो गुरुर्नः ॥ २९ ॥

सुधाधवलदीप्तिमत्तनुसुखासनास्थानिकः
प्रसन्नहृदयस्स्वयं मुकुलनेत्रनीलोत्पलः ।
तटाक इव सेवितस्तदनु हंसमुख्यैरयं
गुरुर्वसतु मानसे गुणतरङ्गितश्रीगुरोः ॥ ३० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदन्वग्रे शिष्यैः परिसरगतैस्तैरनुगतः
प्रविश्यैवं शालां प्रवचनकृतां राजपुरुषैः ।
सकाव्यान् शास्त्रादीन् निगमयुगमौळीनुपदिशन्
सतीर्थ्यैस्सच्छिष्यैर्दिशतु सुमतिं सेवितपदः ।। ३१ ॥

रचयन्नखिलानपि शास्त्रनयप्रगुणानथ सूक्तिमणीन्विशदान् ।
प्रतिवादिजनैः प्रणयप्रणतः प्रतिभातु गुरुः प्रतिभातमसौ ॥ ३२ ॥

अन्तेवासिजनानथोऽनुगमयंस्तीर्थेषु तीर्थेषु च
श्रीवृक्षोत्तरपर्वताग्रशिखराण्यासाद्य सन्दर्शयन् ।
द्रोणीमण्टपदिव्ययोगिवसतीस्संशोधयन्वेङ्कटः
तेषां तन्मृगपक्षिकीटचरितान्यग्रे दिशन्दीव्यति ॥ ३३ ॥

घटवित्पटविद्रसरज्जुकवित्कटदारुदृषत्पुटपुस्तकवित् ।
पशुवित्कृषिवित्सवनौषधिवित्सकलासु कलासु गुरुर्गुणवान् ॥३४॥

शठारिकलिजित्सूक्तिस्तोमसोमकलावलीम् ।
संवर्धयन् वचोभूपाभास्करो गुरुरस्तु नः ॥ ३५ ॥
अथ पामरलोकसमुद्धरणे कृतसाहस एष महामहिमा ।
इतिहासपुराणकथाः प्रवदन् समयं हरिकीर्तिमयं कुरुते ॥ ३६ ॥

अथ संध्यां समास्थाय देवगेहमुपागतः ।
मन्त्रपुष्पाणि देवाय समर्पयति मे गुरुः ॥ ३७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीस्तोत्ररत्नमनुगीय सहाग्रजेन
दिव्येन कण्ठनिनदेन हरिञ्च भक्तान् ।
आनन्दसागरतले किल मज्जयित्वा
सोऽयं समुद्धरति हन्त ! गुरुर्भवाब्धेः ॥ ३८ ॥

तदनु देवमुदीरितपूर्वया सरणितल्लजया समुपाश्रयन् ।
तदनुदापितपावनपारणः प्रियकुटीरमितः प्रियबान्धवः ॥ ३९ ॥

चिरं नानाविद्यापरिचयफलद्बुद्धिसुषमा
हरेर्योगोद्योगाद्विकसितमनःपद्ममहिमा ।
गुरोश्शिक्षावीक्षाकिसलयसमुल्लासिगरिमा
गुरुर्जीयाद्ग्रन्थैस्स्वकरलिखितैर्वीतलघिमा ॥ ४० ॥

ततः परं सुधातरङ्गरङ्गमङ्गलाम्बरं
विधाय हंसतूलतल्पमुत्तमोपधानकम् ।
सुखं शयान एवमेव चिन्तयन् शुभाश्रयं
गुरुं फणीन्द्रभाष्यकारमाश्रयन् गुरुस्स नः ॥ ४१ ॥

श्रीमन्महागुरुगुणानुगुणैकविद्य-
स्सौम्योपयन्तृ-जगदार्यजयध्वजश्रीः ।
वेदान्तदेशिककटाक्षकलाविलास
स्सोयं यतीन्द्रशरणश्शरणं गुरुर्नः ॥ ४२ ॥

जपन् प्रपन्नगायत्रीं सर्वदा यस्समिन्धते ।
स विन्दतां स्वयं प्रीत्या दिनचर्यां गुरुस्स्तुतिम् ॥ ४३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इति किल दिनचर्यां वेङ्कटाचार्य ! नित्यं
कलयितुमनुकूलां मातृकां मे सुतां ते ।
चिरपरिचरणेन प्राप्तसब्रह्मचर्यां
प्रणमतु हृदयं मे वेदशृङ्गारनाम्नीम् ॥ ४४ ॥

इति दिनचर्या — पूर्वभागः

अथ उत्तरभागः — प्रशस्तिः

अथ गुरुगुणतुङ्गां शिष्यसौभाग्यलक्ष्मीं
प्रणिहितमनसाऽस्मद्देशिकेनानुयुक्ताम् ।
परिचयपदमग्रे नेतुमेष प्रयत्नः
परिणतदिनचर्याभोगताम्बूलयोगः ॥ १ ॥

श्रीबालधन्विवंशे जग्गुश्रीशिङ्गरार्यतनयस्सन् ।
वेङ्कटनामा यशसा यद्वद्रौ चिरमुवास विबुधेन्द्रः ॥ २ ॥

तातोप्तविद्यानववीजपात्रं श्रीकुप्पणार्यात्तसमस्तविद्यः ।
विद्वत्परीक्षानिकषात्तवर्णः कर्णाटदेशाधिपमानितो यः ॥ ३ ॥

उभयश्रुतिमौलिसारवेत्ता भगवद्वैभवबोधनैकसक्तः ।
अभयप्रदचक्रमन्त्रजप्ता यदुशैलेशपदाम्बुजैकचित्तः ॥ ४ ॥

द्वादशोर्ध्वतिलकाञ्चितगात्रः पद्मबीजतुलसीमणिकण्ठः ।
पञ्चकच्छसमलङ्कृतमध्यो वैष्णवत्वपिशुनामलवेषः ॥ ५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

"ओरुनायह" सूक्तिं तां शठरिपुगदितां विभावयन्सततम् ।
निर्लिप्तो विषयेऽभूत्सरसिजदलतोयबिन्दुरिव ॥ ६ ॥
भावयन्यतिपतिस्मितमेष श्रीनिधेर्धुरि कृतं बहुभावम् ।
हृद्यपद्यपरिगुंभितमालामार्पयद्यतिवरांघ्रिसरोजे ॥ ७ ॥

श्रीगुणरत्नसमानां यदुगिरिपतिनायकीविनुतिम् ।
चक्रे भारतमङ्गलमच्युतचक्रादिमङ्गलश्चायम् ॥ ८ ॥

मर्मप्रकाशमर्मोद्घाटनमलिखद्भुवि ख्यातम् ।
साहित्यरत्नविरुदं भेजे जयचामभूपालात् ॥ ९ ॥

स चन्द्रिकाचकोराख्यं विमर्शग्रन्थमालिखत् ।
श्रीकृष्णराजसिन्धोश्च सेतुबन्धमरीरचत् ॥ १० ॥

"दिदेशायं मह्यं सरसतरसाहित्यममलं
तथा सांख्यं योगं शठरिपुमहासूक्तिविवृतिम् ।
तथा गीताभाष्यं यतिपतिकृतां सूत्रविवृतिं
पितृव्योऽप्यज्ञं मां पितृवदनुजग्राह कृपया" ॥ ११ ॥

इति वकुलभूषणाख्यो महाकविस्स्तौति यं शिष्यः ।
श्रीवेङ्कटमस्माकं कुलदैवमिवाधिकं गुरुं वन्दे ॥ १२ ॥

"शान्तात्मा श्रुतिशिखरार्थतत्त्ववेत्ता
प्राग्गण्यश्शठरिपुभाववित्सु सत्सु ।
संख्यावान्मतिनिकषे च सांख्यशास्त्रे
जग्गुश्रीकविवरवेङ्कटार्यवर्यः ॥ १३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनेकशास्त्रार्थसुखोपदेशप्रफुल्लपांडित्यसुशिष्यवर्गः ।
श्रीभाष्यमन्त्रार्थमुखोपदेशादाचार्यवर्यो ननु वेङ्कटार्यः ॥ १४ ॥

सौदर्शनादिवरमन्त्रजपात्तसिद्धी
रामानुजांघ्रिकमलस्मरणैकनिष्ठः ।
अर्थानुभूतिसहितस्मृतमन्त्ररत्नः
श्रीशार्पितात्मसकलस्थितिरेष पूज्यः ॥ १५ ॥

यदुगिरिपतिमुररिपुशरणं यतिपरिवृढपदकमलनिधिम् ।
कृतवरवरमुनिचरणनतिं हृदय ! कलय मम पितुरनुजम्" ॥१६॥

इतिजग्गुललितकविना विनुतश्श्रीशिंगरार्येण ।
कलयतु कुशलं वेङ्कटगुरुवर इह सर्वबन्धूनाम् ॥ १७ ॥

" दीव्यत्पाण्डित्यभूम्ना विमलबहुयशा विद्वदग्रेसराणां
वृन्दैस्संश्लाघ्यमानो विरचितविशदानेकसद्ग्रन्थराशिः ।
श्रीमन्नारायणार्ये यदुशिखरिमहाचार्यवाधूलपौत्रे
विन्यस्तस्वात्मभक्तिस्सुगुणगणनिधेश्शिङ्गरार्यस्य सूनुः ॥

विद्वत्साहित्यरत्नं बिरुदमविकलं सांख्यतीर्थप्रशस्तिं
काव्यालङ्कारयोगश्रुतिशिखरमहाविद्वदादिप्रशस्तिम् ।
संप्राप्तोऽनेकशास्त्रेष्ववितथसुमतीन् शश्वदध्याप्य शिष्यान्
नित्यैर्मुक्तैस्सहासौ निरवधि तनुते ब्रह्मविद्याविचारम् ॥"

इति तार्किकनरसिंहः प्रकृतकवियं प्रणौति परभक्त्या ।
तं वन्दे वरवेङ्कटगुरुमहमनिशं ममैव मातृगुरुम् ॥ २० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

" श्रीवेङ्कटनरहरिकृपावर्धितश्शास्त्रसार-
ग्रन्थादिरचनविमलचातुर्यवान्यस्सुशीलः ।
यद्वद्रिशिखरहरिदयापूरितो वेङ्कटार्यो
यद्वद्रियतिपतिचरणं स श्रितश्श्रौतनीत्या " ॥ २१ ॥

इति तार्किकसम्पत्सुतनुतकीर्तिर्वेङ्कटार्यो नः ।
प्रदिशतु सम्पदमखिलां यतीन्द्रचरणैकशरणनिधिम् ॥ २२ ॥

श्रीमद्यतीन्द्रप्रवणप्रभावो गीर्वाणवाण्यां विशदीकृतोऽभूत् ।
धन्यात्मना येन महानुभावं तं वेङ्कटार्यं शिरसा नमामि ॥ २३ ॥

इति भूगर्भविज्ञानी सम्प्रदायसुनिष्ठधीः ।
श्रीसानुदासभक्तोऽयं स्तौति स्तुत्यं स्तुमो गुरुम् ॥ २४ ॥

प्रतिप्रतिपदं पदं वियति विक्षिपन् निक्षिपन्
करं भुवि विभु भ्रमन् विविधभङ्गिभिः प्राङ्गणे ।
शिरश्श्रवणपादकैस्सरसतैलसिक्तैरयं
त्रिदोषहरणीं क्रियां दिशति देहदार्ढ्यप्रदाम् ॥ २५ ॥

इत्यग्रजतनुजः श्रीरामानुजवैद्यकस्स यं शिष्यः ।
श्लाघत्यलघु लघुक्रियमथ लघुसरलं भजे तमुल्लाघम् ॥ २६ ॥

" चाटूक्तौ, ललिते तथा प्रवचने, गाने, तथा हास्यके,
संल्लापे, कवनेऽथ योगकरणे, लोकान्सदा रञ्जयन् ।
सम्प्राप्तात्मरतिर्विचारनिरतो ध्यानैकबद्धादरः
शास्त्रस्तोत्रसुचाटुपद्यरचनाचातुर्यशाली कविः" ॥२७॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इति केनचिदीरितसन्नुतिमानथ चैवमनेकजनैर्विनुतः ।
सततं परिचिन्तितसत्सरणिर्वरवेङ्कटसूरिरसौ शरणम् ॥ २८ ॥

समये सकलं कुर्वन् कालातिक्रमणं जयन् ।
आदिष्टजनताचारस्सभ्यो विजयते गुरुः ॥ २९ ॥

सकालसकलक्रियस्सकलकालयन्ता रविं
सभासु च कलाधरस्सुजननन्दनश्चन्दिरम् ।
शुभाचरणसम्मितस्सततमुज्ज्वलः पावकं
सुदर्शननिदर्शनस्सगुरुरञ्जयत्यञ्जसा ॥ ३० ॥

यस्सञ्चरन् दिव्यदेशान् विष्णुतद्भक्तदर्शनैः ।
तीर्थीचकार तीर्थानि सांख्यतीर्थस्स मे गुरुः ॥ ३१ ॥

शठारिरामानुजसूक्तिरत्नप्रभाभिरिन्दूर्नगरादिषूद्यन् ।
स मे गुरुर्वेङ्कटसूरिवर्यश्चकार विज्ञानमहाप्रभातम् ॥ ३२ ॥

तृणमिवगणयन्यः कालिकत्तापुरोद्यत्-
जनकृतधनविद्याऽऽदानदानाधिकारम् ।
यदुगिरिहरिरत्नं भावयन्नित्यतृप्तो
गुरुगिरि नियतात्मा राजते वेङ्कटार्यः ॥ ३३ ॥

यस्य सद्गुणसहस्रमुन्नयन् दिव्यमञ्जनमुदञ्चयन् गृहे ।
दिव्यदृष्टिकरदेवतागणस्त्रीशरीरमनुविश्य भाषते ॥ ३४ ॥

एवमस्य गुणतुङ्गसेतुना देवतावतरणैकहेतुना ।
दिव्यसंविदुपकारिणाऽमुना विश्वमङ्गलमवाप्यतेऽधुना ॥ ३५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मीदासेऽवतीर्णे यदुगिरिभुवि यस्तेन तां वीरलक्ष्मीं
नित्यैर्मुक्तैश्च देवैस्सरसमभिमतस्संलपन् सप्रमोदम् ।
स्तोत्रैस्सर्वांश्च तांस्तान् हृदि भजति सदा वेङ्कटाचार्यवर्यः
श्रीमद्रामानुजार्यप्रवणमतिरहो ! स्तूयते सूरिभिस्तैः ॥

" कृष्णाश्लेषपरत्वसूचकशुभाश्लेषर्क्षलब्धोदयं
श्रीरामानुजदिव्यसूक्तिविशदीकारैकसक्तं गुरुम् ।
आम्नायान्तयुगार्थसारमननप्रध्वस्तपाप्मावलिं
चक्राद्यद्भुतदिव्यमन्त्रजपिनं श्रीवेङ्कटार्यं भजे ॥३७॥

रामानुजमुनेर्मान्ये बालधन्विकुलाम्बुधौ ।
कौस्तुभोऽप्यद्य वाधूलकुलेन्दुप्रवणोऽस्ति यः ॥ ३८ ॥

यादवाद्रिकुटीरोऽयमाम्नायान्तविशारदः ।
जीयाद्वेङ्कटवर्यश्श्रीशिङ्गरार्यतनूभवः " ॥ ३९ ॥

" यदुक्ष्माभृन्नाथे विनिहितभरं लक्ष्मणमुनेः
सदा श्रीसूक्तार्थस्मरणविधुतस्वान्तकलुषम् ।
पवित्राक्षस्रग्भिः परिकलितकण्ठं निजगुरोः
भजे ध्यानासक्तं यदुगिरिगृहं वेङ्कटगुरुम् " ॥ ४० ॥

" परवासुदेवपरिचर्यया सदा
परवानुपैति परमां मुदं च यः ।
शरणं व्रजामि करुणाकरं गुरुं
वरवेङ्कटार्यमनिशं तमादरात् " ॥ ४१ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कर्मज्ञानसुनिष्ठं तं भगवद्ध्यानतत्परम् ।
सदाचारपवित्राङ्गं वेङ्कटार्यमहं भजे ॥ ४२ ॥

शास्त्रोक्तकर्मनिष्णातो ज्ञाता भक्तिवशंवदः ।
नारायणांघ्रिसक्तात्मा वेङ्कटार्यो विभात्ययम् ॥ ४३ ॥

दिवं गतोऽपि कीर्त्यायं वेङ्कटार्यो महामतिः ।
भुवं गतो जनश्रोत्रेष्वटत्यद्भुतवैभवः ॥ ४४ ॥

अद्भुतवैभव ओं नम इति ॥

ये वै वेदान्तयुग्मे कपिलमुनिमतेऽलङ्कृतौ योगशास्त्रे
सर्वज्ञास्सर्वशास्त्राण्यनुपदमदिशन् वेङ्कटार्याभिधानाः ।
निध्यायन्तो मुकुन्दं मनुभिरनुकलं ते निवासाः कलानां
अस्मन्नेत्रालिपेयस्वचरणनलिना देशिकेन्द्रा जयन्ति ॥४५॥

तत्र यत् वेङ्कटे शैले समिन्धे कुलदैवतम् ।
अत्र तत् यादवे शैले गुरुतां नस्स्वयं गतम् ॥ ४६ ॥

लक्ष्मीदासो भैरवो नीलसूरिः शिवो ब्रह्मा ये च देवास्तथान्ये ।
नित्या मुक्ता योगिनो यश्च सिद्धाः स्तुवन्त्येवं वेङ्कटार्यस्स जीयात् ॥

इति स्तुतिभिरत्यन्तं भक्तिमुद्वहतां सताम् ।
स वस्तनोतु वात्सल्यात् सर्वमङ्गलमङ्गलम् ॥ ४८ ॥

इति अरैयर् श्रीरामशर्मणः कृतिषु
श्रीवेङ्कटार्य दिनचर्या
प्रशस्तिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्री वेङ्कटगुरुमंगलम्

बालधन्विकुलोद्भूत-शिङ्गरार्यतनूद्भुवे ।
यादवाद्रिनिवासाय वेङ्कटार्याय मंगलम् ॥

साहित्यांभोनिधौ कर्षन् मनोनौकां तु मानवीम् ।
महामीनायितो यस्स्याद् भव्यं साहित्यरत्न ! ते ॥

शास्त्रांभोनिधिमन्थान-महाकमठरूपिणे ।
कलालोकधराय स्यात् ते शास्त्रकविरत्न ! शम् ॥

जपयज्ञश्रिया दीव्यल्लीलाकोलायिताय ते ।
ज्ञानैश्वर्यप्रदाय स्यात् महामन्त्रविदे शिवम् ॥

दलयन् दुर्मतानन्तः सतः प्रह्लादयन्निव ।
श्रीनृसिंहात्मने भद्रं मर्मोद्घाटनकीर्तये ॥

दैवीं सम्पदमानेतुं आसुरीं तर्जयन् पदैः ।
बलि-वादिविजेत्रे स्यात् काव्यग्रन्थादिभिश्शुभम् ॥

क्षात्रं तेजस्समाक्रम्य यस्सत्त्वेनैव तिष्ठति ।
गुरुदत्तकुठार ! स्यात् नतराजन्य ! ते शुभम् ॥

लक्ष्मणार्यानुगश्श्रीमान् अपार्थान् लोकरावणान् ।
श्रुतियुक्तिशरैर्व्याहन् यस्ते कौशिकगोत्र ! शम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वधर्मं संदिहानेभ्यो गीताशास्त्रार्थदायिने ।
सिद्धधर्मवरायास्तु वेदान्तद्वयविज्ञ ! शम् ॥

ध्यानयोगात्तसद्बोधः तद्वर्त्मा शान्तमानसः ।
सर्वज्ञो भगवांस्तस्मै सांख्यतीर्थाय मंगलम् ॥

विद्याधीशाय वेदानां सारोद्धारैकहेतवे ।
श्रीहयाननरूपाय श्रीविद्यागुरवेऽस्तु शम् ॥

ज्ञानपारंपरीशक्त्या सर्वत्र भविताऽस्ति यः ।
तस्मै सर्वावताराय वेङ्कटार्याय मङ्गलम् ॥

श्रीरामेणकृतामेतां मंगलाशासनस्तुतिम् ।
स्वीकृत्याचार्यवर्यो वस्तनोतु प्राज्यमङ्गलम् ॥

इति श्रीरामशर्मणः कृतिषु
श्रीवेङ्कटगुरुमंगलम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

टिप्पणी

अक्षस्रक् [प्रशस्तिः श्लो ४०] — अत्र तुलसीकाष्ठविरचितमणिमाला ग्राह्या । सा च गुरोः इत्यनेनान्विता यदा, तदा मन्त्रमूर्तिः इति प्रसिद्धो महायोगी यः श्रीनिवासवरदाचार्यः तस्य सा । किञ्च पवित्रा च सा । अथवा पवित्राणि पद्मबीजाक्षमालिका चेति पवित्राक्षस्रग्भिः इति पदस्यार्थः गुरोरिति च ध्याने अन्वेति ॥

अग्रजः [दिनचर्या-३८ ; प्र-२६] — जगु तिरुनारायणप्पेरुमाल् इति प्रसिद्धः, रसवादी, चित्रशिल्पवान् , गायकः , रक्तकण्ठः , उदाराकारः, द्वितीयशिङ्गरार्यस्य–वकुलभूषणस्य च कवेः, रामानुजवैद्यस्य च पिता ॥

अङ्गेषु [दि-१२] — ललाटोदरवक्षः कण्ठकूबरेषु, औदरपार्श्वे भुजस्कन्धेषु दक्षिणेषु वामेषु च त्रिकवंशे ककुत्स्थाने चेति द्वादशाङ्गेषु ब्रह्मरात्र-पारमेष्ठ्य-नारदीय-संहिताभिः मुख्यपक्षत्वेनोक्तेषु इति भावः ॥

अनुयागः [दि-२९] — भगवन्निवेदितशेषस्यान्नादेः भागवतगोष्ठ्यां भोजनम् इति पाञ्चरात्रागमपरिभाषा ॥

अनुयुक्ताः [प्र-१] — अत्र अनुसृत्य युक्ताः इत्येवार्थः । न तु पृष्टाः इति ॥

अन्त्यादिमाला [दि-९] —'प्रतिमाला' इति कलाशास्त्रे पठिता । पूर्वोक्त-पद्यान्त्याक्षरारंभयुक्तमेव पद्यं तत्तदनन्तरं पठनीयमिति क्रमः ॥

अमरः [दि-४] — अमरसिंहप्रणीतः नामलिङ्गानुशासनाख्यः शब्दकोशः ॥

अलघु [प्र-२६] — अत्यन्तम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आश्लेषिन् [प्र-३७] -- मकरराशिस्थे सूर्ये ग्राह्यम्। अतः 'सूचि मकराश्लेषे'ति सभ्यः पाठः ।

एकपदी [दि-१०] — अयं शब्दः "महाजनो येन गतस्स पन्थाः" इत्यभिप्रायेण एकपदीमधिकृत्य एतत्कृतं प्रबन्धमपि सूचयति इति द्रष्टव्यम् ।

ओरुनायहसूक्तिः [प्र-६] — अत्र ओकारः द्राविडभाषात्वात् ह्रस्वः पठनीयः। शठारिमुनिप्रणीते सहस्रगाधाप्रबन्धे चतुर्थशतकस्थादिमं पद्यमिदम्। तत्र हि – "हे जनाः! एकच्छत्राधिपतयोऽपि बहवः चक्रवर्तिनो राजानः इह जन्मन्येव नरकाधिकं भिक्षाटनसाम्राज्यं अन्ते शरणमकुर्वन्। तदेवं ऐश्वर्य-कैवल्यादिकं नश्वरं विहाय श्रीनारायणपादसेवासाम्राज्यसौभाग्यं स्थिरमेव अनुभवत' इत्युपदिश्यते ।

कर्णाटदेशाधिपः [प्र-३] — प्रथमं चामराजेन्द्रः, अनन्तरं तत्पुत्रः नाल्वडि कृष्णराजः नरसिंहश्च ।

कलाः [दि. ३४. प्र.-३०-४४. मं.३] — प्रायः संङ्गीतादिकं, विविधशास्त्रविषयकं ज्ञानं च विवक्षितम्। कृष्णाजिनादीनां मृदूकरणशोधनादिषु च सिद्धहस्ताः आचार्याः इति च विशेषः।

कलिजित् [दि-२३-३५] — तिरुमङ्गैआळ्वार् इति प्रसिद्धः वैष्णव-दिव्यसूरिः परकालनामा ।

कुप्पणार्यः [प्र-३] — महाचार्यप्रशिष्यः मधुरमंगलं-एम्बार्-योगिशिष्यः मेलुकोटेपुरस्थायाः संस्कृतमहापाठशालाया अध्यक्षः 'द्विपञ्चाशत्, (ऐम्बत्तिरुवर्)इति नाम्ना भगवद्रामानुजाज्ञानुस्यूते वैष्णवसंघेन्तर्भूतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देवालयस्थानिकाधिकारी, श्रीनिवासनरसिंहाचार्यनामा, पण्डितरत्नबिरुदः ।

कुलदैवम् [प्र. १२-४४] — श्रीवेङ्कटेशो भगवान् । स खलु वकुलः कुसुममालालङ्कारेण शठारिमहर्षिणा अधिकं स्तुतः ।

कृष्णराजसिन्धुः [प्र.१०.] — "कृष्णराजसागरः" इति प्रसिद्धः कावेर्याः एको महाह्रदः ।

कौशिकगोत्रः [दि.२८. मं.८.] — (१) यदीयवंशस्य विश्वामित्रः अघमर्षणः, कौशिकः इति क्रमात् प्रवराः, कौशिकश्च महर्षिविशेषो, गोत्रप्रवर्तकः सः (२) कौशिकः कुशिकपुत्रो विश्वामित्र एव तस्य गौः-वाक्-तत्साक्षात्कृतो गायत्रीमन्त्र एव । तं त्रायते-जपोपदेशोप बृंहणादिभिः अयं इति । (३) विश्वामित्रस्य गौः=यज्ञः तद्रक्षको रामः ।

गालिताः [दि.६] — वस्त्ररूपचालिनीयन्त्रशोधिताः ।

गुरुगीः [प्र.३३] — (१) "पठित्वा भाष्यं तत्प्रवचनं (२) अशक्तौ शठरिपोः गिरि श्रद्धा (३) तद्वत् प्रभुपरिचितस्थाननिवहे प्रभोः कैङ्कर्यं वा (४) प्रपदनमनोरर्थमननं (५) प्रपन्नानां वा मे भवतु परिचर्यापरिचयः ॥१॥ (६) कुटीं कृत्वा तस्मिन् यदुगिरितटे नित्यवसतिः षडर्थाः श्रीशस्य प्रपदनविधौ साधकतमाः । इति श्रीमान् रामानुजमुनिरवादीत् प्रियहितं समेषां शिष्याणां परमपदः सोपानमिव यन्" ॥२॥ इत्युक्ताः षडर्थाः, इदञ्च अन्तकाले रामानुजार्यैः खण्डशः उक्तम् । तदैव यथायोगं "इलैयविल्लियाच्चान्" आख्येन तच्छिष्येण संगृहीतमिति इतिहासः श्रुतः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुरुदत्तकुठारः [मं.७.] — स्वगुरोः श्रीनिवासवरदाचार्यात् मन्त्रमूर्तेः सकाशात् नल्लान्वंश्येन नृसिंहनारायणाख्येन गुरुणा लब्धः परशुः। सचास्मै तेन दत्तः।

गुरुपादतीर्थम् [दि.८] — स्नानतोयं गुरुपादतीर्थत्वेन ध्यात्वा तत्र स्नानं विहितमिति ज्ञेयम्।

चतुरश्रपुण्ड्रम् [दि.१२] — तस्यायं सन्निवेशः

छत्री [दि.२४] — राजतं लघु छत्रम्। उत्सवादिषु श्वेतच्छत्रञ्च।

जगदार्यः [दि.४२] — पिल्लैलोकाचार्य इति प्रसिद्धः।

जग्गुः [प्र. २,१३, १७.] — अयं देशीशब्दः एतद्वंश्यपरम्परासंकेतः। अथ च गमनार्थकेन औणादिकेनापभ्रष्टपूर्वः जग्गुशब्दः एतद्वंश्य सविलासगमनसन्तुष्टेन केनचित् राज्ञा प्रयुक्तः इतीतिहासः। एतन्नाम तु वेङ्कटगुरोः पञ्चमेन पूर्वपुरुषेण अळहियशिंगरार्येण लब्धम्।

जयचामः [प्र. ९.] — नरसिंहराजस्य औरस एव कृष्णराजस्य दत्तकः पुत्रः महिशूरमहाराजः।

जलाशयोज्जीवनः [दि. ७.] — (१) ल-ड योरभेदेनात्र जडाः आशयाः अभिप्रायाः येषां तेषां सदभिप्रायबोधनेन सत्पुरुषत्वापादकः। (२) तृण-तूल-पूयशैवाल-कर्पर-शर्करा+अस्थि-करीष+उच्छिष्ट वीटिका कृष्णाङ्गारादिकं तत्प्रदेशात् नित्यं उद्धृत्य तटाकस्थानशोधकः।

तदनुदापितपावनपारणः [दि.३९.] — (१) तेन भगवता श्रीरामानुज सन्निधिस्थाने तदर्चकहस्तद्वारा दत्तस्य पावनस्य भगवन्निवेदित-शेषान्नस्य पारणा नाम व्रतान्तभोजनम्, येन सम्पन्नं सः,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पावनशब्दः अत्र प्रापणपर्यायः । प्रापणशब्दःपाञ्चरात्रे भगवन्निवेदित-शेषान्नेपरिभाषितः । महाभारते च प्रापणं-पावनं इति पाठान्तरेण उपरिचरवसुवृत्तान्तप्रसंङ्गे प्रयुक्तः । अनेकेषु दिनेषु भोजनालाभात् अव्रतोपवासदिनमपि व्रतोपवासदिनमिव भवतिस्मेति वृत्तम् । (२) तदनु अनन्तरं आत्मना पुत्रादिद्वारा दापितमेव पूर्वोक्तमन्नं स्वगृहवासिभ्यः ; न तु स्वयं भुक्तम् । एवं केषुचित् दिवसेषु इति वृत्तम् ।

ताम्बूलयोगः [प्र. १.], — नागवल्लीदलक्रमुकफलानां सुधाचूर्ण कर्पूरादिभिस्सह चर्वणार्थं प्रदानं हि भोजनोत्सवाद्यन्ते सहृदयेभ्यो यथा, तथायमपि भाग इति भावः ।

तार्किकनरसिंहः [प्र. २०.] — एम्बारयङ्गार्याख्यः पण्डितप्रवरः ।

तार्किकसम्पत्सुतः [प्र. २२] — कुप्पणार्यानुजपुत्रः पण्डितः ।

तुलस्याः [दि.१३] — तुलसीकाष्ठमयमणीनां इति भावः ।

त्रिविक्रमः [दि. २७.]— अत्र पूर्वस्वरूपेण वामन एव ग्राह्यः ।

दिव्यप्रबन्धागमभाष्यपीठी [दि. २०] — यादवाद्रौ भगवद्रामनुजसन्निधौ श्रीभाष्यटीका श्रुतप्रकाशिका, सहस्रगाधाटीका षट्त्रिंशत्सहस्रिका च प्रप्रथमं यत्र प्रकाशिता सेयं वेदिका ।

दिव्यसंवित् [दि. २८ प्र.३५] — अञ्जनदृश्याभिः देवताभिस्सह संलापेन स्पष्टीकृतानि शास्त्रार्थरहस्यानि ।

दिव्याञ्जनम् [प्र.३४] — नागवल्लीदले लिप्तं अञ्जनं केषाञ्चिदेव पश्यतां चित्रपटवत् विविधैः विषयैः स्फुरत् त्रैकालिकं अर्थं देवादिव्यक्तिद्वारा श्रावयति , लिपिभिर्वा दर्शयति इति ज्ञेयम् ।

दैवतानां परमः [दि.१७] — दैवतेषु भक्त्या ध्यानासक्तः ।

द्राविडसामवाग्विवरणी [दि. २४.] — शठारिसूरिप्रगीतानां सहस्रगाधानां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्राविडसामवेद इत्यभिधानम् । तद्विवरणी= (१) तिरुक्कोट्टियूर्-नम्बि इत्यभिधानेन रामानुजार्यस्य गुरुणा गोष्ठीपूर्णेन प्रणीता वृत्तिः (२) तिरुनारायणपुरं अरैयर् इत्याख्येन श्रीरामानुजस्य शिष्येण प्रणीताटीका (३) नम्बिल्लै इति प्रसिद्धेन कलिवैरिदासेन रामानुज-प्रशिष्यप्रशिष्येण प्रणीतं षट्त्रिंशत्सहस्रिकाभिधानम् भाष्यम् इत्येतत्त्रयमपि ।

द्वादशमूर्तयः [दि.१३] — "ब्रह्माण्डे- लक्ष्मीनारायणसंवादे" इति श्रीतत्वनिधौ, सच्चरित्ररक्षायाञ्च उपात्ताः, यथा —

" ललाटे केशवं ध्यायेन्नारायणमथोदरे ।
माधवं हृदये चैव, गोविन्दं कण्ठकूबरे ।
उदरे दक्षिणे पार्श्वे विष्णुं व्यासं विचिन्तयेत् ।
तत्पार्श्वे बाहुमध्ये तु चिन्तयेन्मधुसूदनम् ।
त्रिविक्रमं च तत्स्कंधे, वामपार्श्वे तु वामनम् ।
श्रीधरं बाहुके वामे, हृषीकेशन्तु स्कन्धके ।
अपरे पद्मनाभञ्च त्रिके, दामोदरं स्मरेत् ।
ककुदे च तथा कुर्यात् .... ।

अथैतेषां देवीमूर्तयः— —यथा— श्रीः, अमृतोद्भवा, कमला, चन्द्रशोभना; विष्णुपत्नी, वैष्णवी, वरारोहा, हरिवल्लभा, शार्ङ्गिणी देवदेवी, महालक्ष्मीः, लोकसुन्दरी, इति पाञ्चरात्रे ।

धनविद्यादानदानाधिकारः [प्र.३३] — धनस्य अदानं, विद्यायाः दानञ्च, निर्बन्धेन कर्तव्यमित्याकारकः विद्याशालायामधिकारः ।

धर्ममेघः [दि.२८] — योगिनामीश्वरप्रणिधानस्यालम्बनभूतं ईश्वरस्वरूपम्

ध्यानम् [प्र.४०, ४२, मं.१०] — भगवद्भागवताचार्यादिविषयकं प्रेमपूर्वकं निरन्तरचिन्तनम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नामावलिः [दि.२४] — विष्णुसहस्रनामावलिः ।

नारायणस्य+आर्यम् [दि.२८] — तदाख्यस्य तृतीयस्य कुमारस्य पितरं तं-अनुभवेयमित्यन्वयविशेषः ।

नारायणार्यः [प्र.१८] — वेङ्कटार्यस्य पञ्चसंस्कारप्रदः आचार्यवर्यः ।

निगमयुगमौलयः [दि.३१] — संस्कृतद्राविडोभयवेदान्तविद्याः ।

नित्याः [प्र.१९] — वैकुण्ठस्थिताः अनन्त-गरुड-विष्वक्सेनादयः ।

नीलसूरिः [प्र. ४७] —कलिजित् ।

पवित्राणि [दि.१३ प्र.४०] —कार्पासपट्टसूत्रादियष्टयः पर्ववन्धेन मणिमालाकारतां प्रापिताः । देवालयेषु सर्वप्रायश्चित्तोत्सवे भगवता महा विष्णुना धृत्वा दत्ताः ।

पशुवित् [दि.३४] — पशुलक्षण–स्वभाव–चिकित्सा–परिपालनज्ञः ।

पामराः [दि.३६] — अशास्त्रज्ञाः । तेषु केचन-यथा;-गारेमने निंगश्रेष्ठी गंगण्णश्रेष्ठी, पापण्णीगौडः, रामण्णः लवणवणिक्, चिन्नश्रेष्ठी वेळेकाळुश्रेष्ठी, :मुनियः, बोरेगौडः, मलारिश्रेष्ठी, इत्याद्याः ।

पुटः [दि.३४.] — (१) इषीकातृणसूचीस्यूतं पलाशपत्रपात्रादिकम् (२) स्वर्णादिलोहभस्मीकरणाद्यर्थं वनकरीषादिभिः वह्निसंयोजनेन शरावसंपुटादिस्थापनम् ।

पुस्तकम् [दि. ३४.] — (१) लिखित लेख्यादिपत्रग्रन्थः । (२) तूल-वस्त्र-तृण-कम्बल-मृत्-दार्वादिभिः ससिक्थकैः पुत्थलिकादिविरचनम्।

पूजितस्वगृहदेवनृसिंहसुदर्शन [दि.२७.] (१) लक्ष्मीनृसिंहो भगवान् सुदर्शनश्च गृहार्चाविशेषौ । एवं श्रीकृष्णः गोदादेवी चेति। सपरिवाराः एते पूजिताः इति ज्ञेयम् ।

२) अथात्र " केषुचित् दिवसेषु स्वपुत्राभ्यां सुदर्शननृसिंहाभ्यां गृहार्चा-पूजा सम्पद्यते स्म " इतिविशेषस्तु; पूजिताः स्वगृहदेवताः याभ्यां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तौ नृसिंहसुदर्शनौ द्वितीयप्रथमपुत्रौ यस्य स आचार्य इति समास-विवरणवेद्यः। नृसिंह एवात्र पूजकमुख्यत्वात् प्रथमोपात्तः।

प्रतिप्रतिपदं [प्र.२५.] — एकैकस्यामपि पक्षप्रथमायां तिथौ।

प्रतिहारपती [दि.२३] — द्वारपालौ चण्डप्रचण्डाख्यौ।

प्रपन्नगायत्री [दि४३] — श्रीरामानुजशतान्त्यादिनामा श्रीरङ्गामृत-कवीन्द्रविरचितः श्रीरामानुजार्यविषयकः द्राविडप्रबन्धः।

फणीन्द्रभाष्यकारः [दि.४१] — श्रीरामानुजः।

बालधन्वी [दि.१, प्र.२, .३८, मं.१.] — श्रीवैष्णवसिद्धान्तसंरक्षकस्य श्रीरामानुजार्यस्य मातृष्वस्रीयः प्रणवधनुषा आत्मशरं बाल्य एव सम्यक् परमात्मनि लक्ष्ये निवेशनेन "इलैयविल्लि" इति द्राविड-भाषायां लब्धनामधेयः। किञ्च– यं जातमात्रमेवानुजग्राह भगवान् भाष्यकारः "यत् बालोऽपि धन्वीव प्रतिभाशरासनवप्रयुक्तेन शास्त्रवागाशुगेन वावदूकान् कुतंत्रानखिलानपि जेष्यति, तन्नाम्ना बालधन्वी" इति च। श्रीरामानुजप्रतिष्ठापित चतुस्सप्तति पीठाधिपेषु एकतमः आचार्यः। यस्मात् एकचत्वारिंशः प्रकृतः वेङ्कटगुरुः।

मणिप्रकाशः [दि.२८.] — वेङ्कटार्य द्वितीयपत्न्याः यगम्माम्बायाः मुक्तद शायां नाम लक्ष्मीदासादिभिः कृतम्। भगवान् किल यादवाद्रि-नृसिंहः अस्याः लोचनगोचरीभवन् स्वकण्ठाभरणस्य कौस्तुभमणेः प्रकाशेन स्वस्वरूप–रूप–गुणविग्रहविभूत्यादिकं दिव्यमप्यस्यै विदांकारयामास जीवद्दशायामिति वृत्तम्।

मन्त्रपुष्पम् [दि.३७.] पुष्पाणि अञ्जलौ कृत्वा चतुर्वेदेतिहासपुराणाचार्य-सूक्तिरत्नानि द्विरुच्चार्य भगवते अर्चनार्थं समर्पयेदिति विहितम् मन्त्ररूपम् –मन्त्रितं वा पुष्पम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मन्त्ररत्नम् [.प्र१५.] — द्वयमन्त्रः ।

मन्त्रार्थः [प्र.१४.] अष्टाक्षर – द्वय – चरमश्लोकाख्यरहस्यत्रयव्याख्या ।

मर्मोद्घाटनकीर्तिः [प्र.५.] — रसगङ्गाधरमर्मप्रकाशग्रन्थस्य मर्मोद्घाटनाख्य खण्डनखण्डप्रबन्धरचनेन जाता अस्य कीर्तिः मधुरानाथशास्त्रि प्रणीतायां रसगंगाधरव्याख्यायां सरलाख्यायां उपोद्घाते सम्यक् प्रतिपादिता ।

महाकविः [प्र.१२.] — अद्भुतदूतादिमहाकाव्य – नाटकादिप्रणेता

महागुरुः [दि.४२] — तिरुनारायणपुरं दोड्डयाचार्य इति प्रसिद्धः श्रीनिवासगुरुः ।

मातृका [दि. ४४.] — (१) अक्षरमाला । दिनचर्याग्रन्थरचने समर्था इयं गुरोः शिक्षणात् सञ्जाता । (२) मातृस्थानीया मातुः ज्येष्ठभगिनी । सा किल बाल्य एव विधवा भूत्वा स्वपितृसेवापरायणा ब्रह्मचर्येण कारुण्यगुणपूर्णा सर्वानस्मदादीन् पुपोष । स्वपितुश्च नित्यचर्यासु उपस्करान् सज्जीकृत्य तं देवमिव उपचचार च ।

मातृगुरुः [प्र.२०] — मातामहः । श्रीरङ्गाम्बानाम्नी अस्मन्माता वेङ्कटार्य गुरोः पुत्रीषु तृतीया ।

मुक्ताः [प्र.१९] —पराङ्कुश – परकाल – यतिवरादयः आल्वाराचार्याः ।

यतिपतिः, यतिपरिवृढः यतिराजः, यतिवरः, यतीन्द्रः = श्रीरामानुजः

यतीन्द्रचित्तम् [दि.२२]— भगवतः सम्पत्कुमारस्य उत्सवबिम्बस्य यत् गर्भगेहं सविमानं, तस्येदं नाम "यतिराजहृदयं" इति ।

यतीन्द्रप्रवणः [प्र.२३]— वरवरमुनिः ।

यद्वद्रिशिखरहरिः [प्र.२१] योगानन्दनृसिंहो भगवान् ।

यादवाद्रिः [दि.१.] — भरतखण्डस्य प्रधानवैष्णवक्षेत्रेषु अष्टसु मध्ये "वेदशैलः" इति प्राक् प्रसिद्धः, इदानीं "मेलुकोटे" इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कर्णाटदेशे मैसूरुप्रान्ते मण्ड्याजिल्लायां विद्यते ।

योगकरणम् [प्र.२७.] — योगशास्त्रोक्तं आसन – प्राणायाम – प्रत्याहारादिकम् ।

रसरज्जुकवित् [दि.३४] रसाः, = काव्यरसाः नव; पाकरसाः षट्; पारदादयो रसधातवः; आनन्दमयब्रह्मविद्या च ।

रज्जुकम् [दि. ३४.] — पशुबन्धाद्युपकरणरज्जुः। मेखलाबन्धरज्जुः। सांसारिकः, शारीरकश्च रज्जुविशेषः पुराणशास्त्रपठितः ।

रहस्यगणाः [दि.२७.] — वेदान्तरहस्यग्रन्थाः लोकाचार्य-सौम्यजामातृमहामुनिप्रभृतिपूर्वाचार्यप्रणीताः ।

लक्ष्मणभाषितम् [दि.७२] — ब्रह्मसूत्रस्य भगवद्रामानुजविरचितं श्रीभाष्यम् ।

लक्ष्मणमुनिः [प्र.४०.] — श्रीरामानुजः ।

लक्ष्मीदासः [प्र. ३६, ४७.] — विष्वक्सेनः विष्णुसेनापतिः । दिव्याञ्जनाधिपतिः ।

लघु [प्र.२६.] — क्षिप्रम् । लघुः = छन्दश्शास्त्रोक्तः एकमात्राकालिको वर्णः ।

ललितकविः [प्र.१७.] ललितं यथा तथैव कवते, इति ।

लीलाकोलः [मं. ४.] महाविष्णोः वराहावतारः ।

वचोभूषा [दि.३५] —श्रीवचनभूषणाख्यं लोकाचार्यप्रणीतं ग्रन्थरत्नम् ।

वनौषधिवित् [दि. ३४.] वनं = अरण्यं, जलञ्च ।

वरवरो योगी [दि.१९.] — रम्यजामातृमहामुनिः । शेषांशस्य भगवतो रामानुजस्यापरावतारः ।

वाधूलः [प्र.१८.] — गोत्रप्रवर्तको महर्षिविशेषः । भार्गव – वीतहव्य – सावेदसैः सप्रवरः । तद्गोत्रजातश्च वाधूल एव ।

वाधूलकुलेन्दुः [प्र.३८.]: — यदुगिरिमहार्यपौत्रः नारायणमहागुरुः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाराहः [दि.१७.] — वराहएव विष्णोरवतारः ।

विज्ञापकाख्या [दि.२४.] — "विण्णप्पं शैवार्" इति, "अरैयर्" इति च द्राविडभाषाप्रसिद्धं विष्णुगायकस्य तादृशकैङ्कर्यौपाधिकं अभिधानम् ।

विभु [प्र.२५.] — विस्तारेण, अत्यन्तं इति भावः ।

वीरलक्ष्मीः [प्र.३६.] — स्वतन्त्रवीरलक्ष्मीः पाञ्चरात्रागमे पुराणेषु च ज्ञेया । विष्णोः भूमिस्थः विष्णुलोक इव तत्पत्न्याः महालक्ष्म्याः अस्या एव श्रीलोकाख्यं स्थानं प्रसिद्धम् ।

वेङ्कटनरहरिः [प्र.२१.] — वेङ्कटेशो भगवान्, नृसिंहश्च । तदुभय नामवान् आचार्यः कुप्पणार्यः ।

वेदशृङ्गारः [दि.४४] — (१) इयं वेदार्थस्य अलङ्करणमेव अक्षरमाला; औज्ज्वल्यहेतुत्वात् । कोऽसौ वेदार्थः ? योऽयं "यस्य देवे पराभक्तिः यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति ।

(२) वेद इति क्रियापदम् । यत्तच्छब्दाध्याहारेण वाक्ये योजनीयम् । अथ शृङ्गारशब्दोऽयं सिंहार्यशब्दात् अपभ्रष्टस्य शिंगार इति द्राविडभाषाशब्दस्य अनुकारी शब्दः । शिंगारम्मा इति अस्मज्ज्येष्ठमातुः नाम ।

वेदान्तदेशिकः [दि. ४२.] वेङ्कटनाथार्यनामा आचार्यः ।

शठजित् [दि.२३.]— नम्माळ्वार् इति द्राविडभाषाप्रसिद्धः पराङ्कुशमुनिः वैष्णवदिव्यसूरिमुख्यः ।

शब्दाः [दि.४.] — सुबन्तानां तिङन्तानां च शब्दानां रूपमालाः ।

शाला [दि.३१] — यादवाद्रिस्था वेदवेदान्तबोधिनी संस्कृतमहाविद्याशाला ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शारत्रव विरुदम् [मं.३] — इदं विरुदं श्रीयदुगिरियतिराजनारायणमुनिभिः प्रदत्तम् ।

शिङ्गरार्यः [दि.१.प्र.१७] — (१) पण्डितः सहृदयः परश्शतग्रन्थलेखकः, वृत्तमुक्तासारावलीकारः भगवतो रामानुजार्यस्याज्ञया सिद्धां यादवाद्रिनित्यवसतिं स्वपूर्वपुरुषपरम्परया स्वागतां परिपालयन् आसीत्। अस्यैव द्वितीयभार्यायां द्वितीयः पुत्रः वेङ्कटार्यः ।

(२) शिङ्गरार्यस्य पौत्रः ललितकविः यदुशैलचम्पूप्रमुखप्रबन्धप्रणेता द्वितीयः शिङ्गरार्यः ।

शिष्याः [दि.३१.] — अक्षराभ्यासादारभ्य आवेदान्तरहस्यदर्शनं अस्मादर्धातिनः यथासम्भवम् । तेषु केचन —

(१) एम्बार् नरसिंहाचार्यः, (२)नीलत्तंपळ्ळि वेङ्कटनरसिंहाचार्यः (३) रामानुजमुनिनारायणैय्यंगार्यः, (४) जवलीरामस्वामैय्यङ्गार्यः (५) जग्गु रामानुजैय्यङ्गार्यः, (६) जग्गु शिंप्रैय्यङ्गार्यः, (७) जग्गु आळ्वारय्यङ्गार्यः (८)मण्डयं आळ्वार् तिरुमलैय्यङ्गार्यः, (९) स्थानिकं सम्पत्कुमाराचार्यः, (१०) शास्त्रिचक्रवर्ति कृष्णैय्यङ्गार्यः, (११)तिरुवाय्मोळितिरुनारायणय्यङ्गार्यः, (१२) अक्कारक्कनि सम्पत्कुमाराचार्यः (१३) प्रतिवादिभयङ्करं नरसिंहाचार्यः, (१४) मकरं अळहिय शिङ्गरार्यः, (१५) अनन्दाण्पिल्लै श्रीनिवासराघवाचार्यः, (१६) छत्री राजगोपालाचार्यः,(१७) रा. अय्यनय्यङ्गार्यः, (१८) नल्कुन्दी नरसिंहाचार्यः, (१९) नल्कुन्दी अनन्ताचार्यः, (२०) एस्, एस्, राघवाचार्यः, (२१) इयल् पिळ्ळै श्रीनिवासैय्यङ्गार्यः, (२२) अरैयर् श्रीनिवासैय्यङ्गार्यः, (२३) जग्गु सुदर्शनाचार्यः, (२४) ऐशामी नरसिंहैय्यङ्गार्यः, (२५) जग्गु नरसिंहाचार्यः, (२६)इलैयनिल्ली स्वामी (२७) आ.न.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीनिवासैय्यङ्गार्यः, (२८) मुडुम्बै नरसिंहाचार्यः, (२९) कैङ्कर्य श्रीनिवासय्यङ्गार्यः, (३०) वोक्करणे सम्पत्कुमाराचार्यः, (३१) वोक्करणे चक्रवर्ती, (३२) मुडुम्बै रामानुजाचार्यः, (३३) श्रीस्वामी रामनारायणाचार्यः औत्तराहजगद्गुरुरामानुजः, (३४) भट्टश्री सुरेन्द्रनाथशास्त्री, वाराणसेय-संस्कृत-विश्वविद्यालयस्योपकुलपतिः, (३५) वेटरायस्वामी, (३६) केलमङ्गलम् वेङ्कटाचार्यः, (३७) जग्गुनारायणः, (३८) जग्गु वेदाम्बा (३९) जग्गु शल्वनायकी, (४०) ओम्बदुवृत्ति यग्गम्मा, (४१) पौत्री गोदा, (४२) अरकेरे तिरुनारणैय्यङ्गार्यः, (४३) जयरामो नारायणैय्यङ्गार्यः, (४४) एम्. ओ. एस्. अय्यङ्गार्, (४५) बालधन्वी कृष्णय्यङ्गार्यः, (४६) वोक्करणेनरसिंहाचार्यः। (४७) शान्तिग्रामीणः शल्वपिळ्ळैशर्मा, (४८) कल्याणीकरे रामानुजय्यङ्गार्यः, (४९) बुरुडु कृष्णैय्यङ्गार्यः, (५०) करुमाणिक्यं अय्यङ्गार्यः, (५१) नाटम्पल्ली वेङ्कटाचार्यः, (५२) तिरुमलैय्यङ्गारैय्यन्, (५३) जटावल्लभं रामस्वामि अय्यङ्गार्यः, (५४) कडाम्बी श्रीनिवासैय्यङ्गार्यः (५५) भा. वं. अळहियशिङ्गरार्यः, (५६) करगं शेषय्यङ्गार्यः, (५७) पेनुकोण्डे देशिकाचार्यः, (५८) परिचारक नारायणैय्यङ्गार्यः, (५९)अरैयर्श्रीरामशर्मा इत्यादयः।

शुभाश्रयः [दि. ४१] — भगवतः तत्तत्स्वरूपानुगुणः अर्चाविग्रहः।

श्रीगुरुः — [दि.३०.] भगवान्नारायणः, विष्वक्सेनः, शठारिः, रामानुजः इत्यदिराचार्यवर्गः।

श्रीचूर्णम् [दि.१२.] — भगवदभिषिक्तशेषं रक्तवर्णं हरिद्राचूर्णं श्वेतमृदूर्ध्व पुण्ड्रतिलकान्तराले लक्ष्मीव्यञ्जकं वैष्णवैर्धार्यम्।

श्रीनिधिः [प्र.७.] — श्रीनारायणः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीपादपट्टावलिः [दि.१५.] । कौशेयवस्त्रखण्डानि, तत्तद्दिव्यदेशवर्ति देवबिम्बानां पादचिह्नैः काश्मीरजन्मगैरिकादिलेपनप्रतिलब्धैः विराजमानानि ।

श्रीमूर्तयः [दि.१४.] — सालग्रामशिलात्वेन प्रसिद्धाः हिमालये गण्डकी सरित्कुण्डेषु लभ्याः भगवतो नारायणस्यार्चामूर्तयः । न तु नर्मदाशिलाः ।

श्रीसूक्तम् [प्र.४०.] — ऋग्वेदखिलेषु पठिताः लक्ष्मीविषयाः मन्त्राः । (२) प्रशस्ता सूक्तिश्च ।

श्रौतनीतिः [प्र.२१.] — तत्क्रतुन्यायः । "यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति" — इति उपनिषत्प्रसिद्धः । यतिपतेः रामानुजस्य चरणौ संश्रितः तदेकध्यानेन वैकुण्ठलोकगतोऽपि तावेव तत्रापि परिचरतीति भावः ।

सकालेत्यादि [प्र.३०.] —सुदर्शनचक्रवत् विष्णुसंकल्पानुगुणकर्मकारी स्वकीयैर्गुणैः तेजस्त्रयमपि एवं भावुकमनसि स्फुरितं सत् करोतीति भावः ।

सपीठम् [दि.१२.] रामानुजेति नामधेयेन प्रसिद्धं भ्रूमध्यादधोनासिकायास्त्रिभागे कमलवराटक – सर्पफणाद्याकारेण विद्यमानः ललाटतिलकस्याधोभागः एव पीठम् ।

सरणितल्लजा [दि.३९.] — "यान्तं गृहन्तं यदुशैलनेतु"रित्यारभ्य "हृदयं गतो मे" इत्यन्तैः श्लोकैः उक्तः शुद्धः भगवद्दर्शनक्रमः ।

सरसाशयः [दि.४.] — रसो जलं आनन्दश्च । तद्वतां मत्स्यादीनां रसिकजनानां च आश्रयः तटाकः । सरसाः अभिप्रायाः येषां तैः जनैः-सर्वदा स्नानादिभिः भोग्योऽयं तटाकः एवमद्यापि द्रष्टव्यः कर्णाटभाषायां "दलवायिकेरे" इति प्रसिद्धः ।

सर्वज्ञः [मं.१०.] — सर्वज्ञत्वं सर्वज्ञविष्णुशरीरत्वेन, प्रकृतिविनिर्मुक्तजीवा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्मगुणवत्त्वेन वा बोध्यम् । शब्दसाम्यात् बुद्धावतारसूचनमात्रम् ।

सांख्यतीर्थप्रशस्तिः [प्र.१९.] — वङ्गदेशे कालिकत्तानगरविद्वद्वृन्दैः दत्तः उपाधिः ।

सानुदासभक्तः [प्र.२४] — सानुदासो नाम वरवरमुनेराचार्यः तिरुनारायण-पुरत्ताय् इति प्रसिद्धः । तस्यपरम्पराचार्येषु भक्तः शिष्यश्च आ.न. श्रीनिवासैय्यङ्गार्यः ।

सितसान्तरालम् [दि.१२.] — सितमृत्तिकारचितत्वात् सितम् । भगवतः सान्तरालपादद्वयाकारवत्वात् सान्तरालञ्च ।

सिद्धधर्मवरः [मं.९.] सिद्धधर्मं नारायणं वृणीते इति वा ; सिद्धधर्मेषु भगवद्भागवताचार्यपर्यन्तेषु वरस्तावदाचार्यो रामानुजः, तमाश्रितो वा आचार्यः । अस्माकं सिद्धधर्मेषु श्रेष्ठो वा । तथोक्तम् — " आचार्यस्सद्भिरप्रत्युपकरणधिया देववत् स्यादुपास्यः " इति ।

सूत्रवतीदयितः [दि.२३.] — विष्णुसेनापतिः । विष्वक्सेनः ।

सेतुबन्धः [प्र.१०.] — एतदभिधानं संस्कृतबद्धं खण्डकाव्यम् :कावेरीसेतु विषयकम् ।

सेवितपदः [दि.३१.] — सेवितौ पादौ प्रणामादिभिः, सेवितानि च पदानि शब्दानुकरणादिभिः इति ज्ञेयम् ।

स्तोत्ररत्नम् [दि.३८.] भगवद्यामुनमुनिप्रणीतं विष्णुस्तोत्रम् ।

स्त्रीशरीरम् [प्र.३४.] — स्वपत्न्याः यगिनाम्न्याः, स्वाग्रजतृतीयस्नुषायाः यगम्मनाम्न्याः च शरीरम् ।

हंसमुख्याः — [दि.३०] काञ्चीयदुगिरिवादिकेसरिश्रीमत्सौम्यजामातृ-मुनिरित्येकाभिधानं मुनित्रयम्; यदुगिरियतिराजमुनिद्वयम्; वाधूलश्रीशैलार्यगुरुवर्यः, औत्तराहजगद्गुरुश्रीरामनारायणाचार्यः इत्येवमादयः सर्वेऽप्याश्रमिणः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हयाननरूपः [मं.११.] — अत्र कल्किस्थाने हयग्रीवावतारः अनुसंहितः ।
कल्की वाजिवक्त्रः इति पुराणप्रामाण्यात् ।

हरिः [प्र.३३.] — श्रीनारायणः इन्द्रनीलमणिस्वच्छमूर्तिः क्वचित्तादृशो नृसिंहः ।

हृद्यागः [दि. १६.] — मानसी पूजा ।

ग्रन्थकर्तुः परिचयः

1 अस्ते यदुगिरिर्नाम देशे कर्णाटके गिरिः ।
यत्र नारायणश्रीमान् सिंहसंहननो हरिः ॥

2 सदा तदीयसेवैकफलास्वादरसोत्सवाः ।
विलसन्ति बुधास्तत्र शास्त्रसर्वस्ववासवाः ॥

3 तेषां विनयविद्यादिगुणैर्गुरुतरो गुरुः ।
वेङ्कटार्य इति श्रीमानासीत्कविकुलाङ्कुरः ॥

4 बालधन्विकुलोद्भूतशिङ्गरार्यतनूभुवः ।
सांख्ययोगरहस्यार्थवेदान्तद्वयदर्शिनः ॥

5 तस्यैव दुहितुः पुत्रः पुत्रवत्तेन पालितः ।
ज्ञानविज्ञानसम्पत्तिं प्रापितश्चास्ति बालकः ॥

6 तेन रामाभिधानेन श्रुतदृष्टार्थदर्शिनी ।
विदुषां नित्यशिष्येण दिनचर्या गुरोः कृता ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शोधनपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
स्नात्व	स्नात्वा	2	1
लनेत्र	लिताक्षि	4	18
श्रयन्	श्रितः	6	5
श्रयन्	श्रयो	6	14
मिन्ध	मेध	6	19
श्री	"श्री	7	11
ण्ठ	ण्ठः	7	17
"दि	दि	8	11
ग	ग	9	9
ऽयं	यं	10	10
चकशुभा	चिमकरा	12	5

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.